# nityAkavacham

# નિત્યાકવચમ્

## Document Information

Text title : nityAkavachamtantrarAja

File name : nityAkavachamtantrarAja.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Latest update : May 6, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# નિત્યાકવચમ્

તન્ત્રરાજતન્ત્રે અષ્ટાવિંશં પટલાન્તર્ગતમ્ ।

સમસ્તાપદ્વિમુક્ત્યર્થં સર્વસમ્પદવાપ્તયે ।
ભૂતપ્રેતપિશાચાદિપીડાશાન્ત્યૈ સુખાપ્તયે ॥ ૧॥

સમસ્તરોગનાશાય સમરે વિજયાય ચ ।
ચોરસિંહદ્વીપિગજગવયાદિભયાનકે ॥ ૨॥

અરણ્યે શૈલગહને માર્ગે દુર્ભિક્ષકે તથા ।
સલિલાદિમનઃ પીડાસ્વબ્ધૌ પોતાદિસઙ્કટે ॥ ૩॥

પ્રજપ્ય નિત્યાકવચં સકૃત્સર્વન્તરત્યસૌ ।
સુખી જીવતિ નિર્દ્વન્દ્વો નિઃસપત્નો જિતેન્દ્રિયઃ ॥ ૪॥

શ઼ૃણુ તત્ કવચં દેવિ વક્ષ્યે તવ તદાત્મકમ્ ।
યેનાહમપિ યુદ્ધેષુ દેવાસુરજયી સદા ॥ ૫॥

સર્વતઃ સર્વદાત્માનં લલિતા પાતુ સર્વગા ।
કામેશી પુરતઃ પાતુ ભગમાલા ત્વનન્તરમ્ ॥ ૬॥

દિશં પાતુ તથા દક્ષપાર્શ્વં મે પાતુ સર્વદા ।
નિત્યક્લિન્ના ચ ભેરુણ્ડા દિશં પાતુ સદા મમ ॥ ૭॥

તથૈવ પશ્ચિમં ભાગં રક્ષેત્ સા વહ્નિવાસિની ।
મહાવજ્રેશ્વરી રક્ષેદનન્તરદિશં સદા ॥ ૮॥

વામપાર્શ્વં સદા પાતુ દૂતી મે ત્વરિતા તતઃ ।
પાલયેત્તુ દિશં ચાન્યાં રક્ષેન્માં કુલસુન્દરી ॥ ૯॥

નિત્યા મામૂર્દ્ધ્વતઃ પાતુ સાધો મે પાતુ સર્વદા ।
નિત્યા નીલપતાકાખ્યા વિજયા સર્વતશ્ચ મામ્ ॥ ૧૦॥

કરોતુ મે મઙ્ગલાનિ સર્વદા સર્વમઙ્ગલા ।

દેહેન્દ્રિયમનઃપ્રાણાન્ જ્વાલામાલિનિવિગ્રહા ॥ ૧૧॥

પાલયેદનિશં ચિત્રા ચિત્તં મે પાતુ સર્વદા ।
કામાત્ ક્રોધાત્તથા લોભાન્મોહાન્માનાન્મદાદપિ ॥ ૧૨॥

પાપાન્મત્સરતઃ શોકાત્ સંશયાત્ સર્વતઃ સદા ।
સ્તૈમિત્યાચ્ચ સમુદ્યોગાદશુભેષુ તુ કર્મસુ ॥ ૧૩॥

અસત્યક્રૂરચિન્તાતો હિંસાતશ્ચૌર્યતસ્તથા ।
રક્ષન્તુ માં સર્વદા તાઃ કુર્વન્ત્વિચ્છાં શુભેષુ ચ ॥ ૧૪॥

નિત્યાઃ ષોડશ માં પાન્તુ ગજારૂઢાઃ સ્વશક્તિભિઃ ।
તથા હયસમારૂઢાઃ પાન્તુ માં સર્વતઃ સદા ॥ ૧૫॥

સિંહારૂઢાસ્તથા પાન્તુ માન્તરક્ષગતા અપિ ।
રથારૂઢાશ્ચ માં પાન્તુ સર્વતઃ સર્વદા રણે ॥ ૧૬॥

તાર્ક્ષ્યારૂઢાશ્ચ માં પાન્તુ તથા વ્યોમગતાસ્તથા ।
ભૂગતાઃ સર્વદા પાન્તુ માઞ્ચ સર્વત્ર સર્વદા ॥ ૧૭॥

ભૂતપ્રેતપિશાચાપસ્મારકૃત્યાદિકાન્ ગદાન્ ।
દ્રાવયન્તુ સ્વશક્તીનાં ભીષણૈરાયુધૈર્મમ ॥ ૧૮॥

ગજાશ્વદ્વીપિપઞ્ચાસ્યતાર્ક્ષ્યરૂઢાખિલાયુધાઃ ।
અસંખ્યાઃ શક્તયો દેવ્યાઃ પાન્તુ માં સર્વતઃ સદા ॥ ૧૯॥

સાયં પ્રાતર્જપન્નિત્યાકવચં સર્વરક્ષકમ્ ।
કદાચિન્નાશુભં પશ્યેન્ન શ◌ૃણોતિ ચ મત્સમઃ ॥ ૨૦॥

ઇતિ ષોડશનિત્યાતન્ત્રેષુ શ્રીકાદિમતે લોકતાદાત્મ્યાદિકથનં નામ
અષ્ટાવિશં પટલાન્તર્ગતં નિત્યાકવચં સમ્પૂર્ણમ્ ॥ ૧

From tantrarAja paTala, shloka 52-71

NA

*nityAkavacham*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*